**TERM-1_EXAMINATION (2026-27)**

**SANSKRIT (119) SET - 2**

Class : IX | Duration : 3 Hrs
Date : 04.09.2026 | Max. Marks : **80**
Admission No: | Roll No:

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

प्रश्नपत्रस्वरूपम् -

| | |
|---|---|
| 'क' भागः अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः : रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः : अनुप्रयुक्तव्याकरणम् | 28 अङ्काः |
| 'घ' भागः : पठितावबोधनम् | 27 अङ्काः |

---

खण्ड–क : अपठितावबोधनम् (10 अंकाः)

प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

विद्यालयस्य समीपे एकः सुन्दरः उद्यानः अस्ति। तस्मिन् उद्याने बहवः वृक्षाः, पुष्पाणि, लताः च सन्ति। प्रतिदिनं प्रातःकाले जनाः तत्र भ्रमणार्थं गच्छन्ति। बालकाः क्रीडन्ति, वृद्धाः योगाभ्यासं कुर्वन्ति, महिलाः परस्परं वार्तालापं कुर्वन्ति। विद्यालयस्य छात्राः अपि शनिवासरे तत्र स्वच्छताभियानं कुर्वन्ति। ते वृक्षान् सिञ्चन्ति, अपशिष्टानि संगृह्णन्ति, नूतनपादपान् रोपयन्ति च। प्रधानाचार्यः सर्वान् छात्रान् पर्यावरणसंरक्षणस्य महत्त्वं बोधयति। सर्वे छात्राः प्रतिजानन्ति—"वयं स्वपर्यावरणं सदैव रक्षिष्यामः।"

(अ) एकपदेन उत्तरत - (प्रश्नद्वयम्) (2×1=2)
(i) उद्यानः कुत्र अस्ति?
(ii) छात्राः कदा स्वच्छताभियानं कुर्वन्ति?
(iii) प्रधानाचार्यः कस्य महत्त्वं बोधयति?

(आ) पूर्णवाक्येन उत्तरत - (प्रश्नद्वयम्) (2×2=4)
(i) बालकाः उद्याने किं कुर्वन्ति?
(ii) छात्राः स्वच्छताभियाने कानि कार्याणि कुर्वन्ति?
(iii) छात्राः किं प्रतिजानन्ति?

(इ) निर्देशानुसारम् उचितविकल्पं चिनुत- (प्रश्नत्रयम्) (3×1=3)

(i) 'सुन्दरः' इति पदस्य विलोमपदम्—

(अ) रमणीयः (आ) कुरूपः

(इ) विशालः (ई) उत्तमः

(ii) 'वृक्षः' इति पदस्य पर्यायः—

(अ) पादपः (आ) नदी

(इ) पर्वतः (ई) ग्रामः

(iii) 'बालकाः क्रीडन्ति।' अत्र क्रियापदं किम्?

(अ) बालकाः (आ) क्रीडन्ति

(इ) उद्याने (ई) जनाः

(iv) 'जनाः प्रातःकाले गच्छन्ति।' अत्र कर्तृपदं किम्?

(अ) प्रातःकाले (आ) जनाः

(इ) गच्छन्ति (ई) उद्यानम्

(ई) अस्य गद्यांशस्य उचितं शीर्षकं लिखत - (1×1=1)

## खण्ड–ख : रचनात्मककार्यं (15 अंकाः)

प्रश्न 2. अधोलिखितं पत्रं मञ्जूषायां दत्तैः पदैः सहायतया पूरयित्वा पुनः लिखत। (1/2×10=5)

सेवायाम्,

श्रीमान् (1) __________

सरस्वती विद्यालयः, पुणे।

विषयः – (2) __________ प्रार्थना-पत्रम्।

महोदय!

सविनयं निवेदयामि यत् अहं नवमकक्षायाः (3) __________ अस्मि। मम स्वास्थ्यं सम्यक् नास्ति। चिकित्सकेन मम (4) __________ निर्दिष्टा। अतः अहं विद्यालयम् आगन्तुं न शक्नोमि। कृपया (5) __________ अवकाशं प्रदातुम् कष्टं करोतु। अहं स्वस्थः भूत्वा पुनः विद्यालयम् (6) __________।

धन्यवादः।

दिनाङ्कः (7) __________

भवदीयः

(8) __________

कक्षा – IX

अनुक्रमाङ्कः (9) __________

स्थानम् (10) __________

मञ्जूषा

(त्रिदिनीयं, आगमिष्यामि, पुणे, 15.09.2026, रामशर्मा, 18, प्रधानाचार्यम्, छात्रः, त्रिदिनीय-अवकाशस्य, पूर्णविश्रान्तिः)

प्रश्न 3. अधोलिखितं चित्रं दृष्ट्वा संस्कृतेन पञ्च वाक्यानि लिखत- (1×5=5)




मञ्जूषा

(विद्यालयः, छात्राः, प्रार्थना, शिक्षकाः, अनुशासनम्, ध्वजः, गायन्ति, उपतिष्ठन्ति, प्रेरणा)

अथवा

'समयपालनस्य महत्त्वम्' इति विषये मञ्जूषायाः सहायतया पञ्च वाक्यानि लिखत।

मञ्जूषा

(समयः, जीवनम्, सफलता, परिश्रमः, विद्यार्थी, नियमानुसारम्, कार्यम्, उन्नतिः, आवश्यकम्)

प्रश्न 4. निम्नलिखितम् संवादं मञ्जूषाप्रदत्तपङ्क्तिसहायतया पूरयित्वा पुनः लिखत - (1×5=5)

विद्यालये वृक्षारोपणकार्यक्रमः

राहुलः — मित्र! श्वः विद्यालये (1) __________ भविष्यति।

मोहनः — आम्। अहम् अपि तत्र (2) __________।

राहुलः — त्वं कति (3) __________ आनयसि?

मोहनः — अहं पञ्च पादपान् आनयामि।

राहुलः — वृक्षारोपणेन कः (4) __________?

मोहनः — पर्यावरणस्य संरक्षणं भवति तथा (5) __________ शुद्धः भवति।

मञ्जूषा

(वृक्षारोपणकार्यक्रमः, भागं गृह्णामि, पादपान्, लाभः, वायुः)

अथवा

अध: एका कथा लिखिता अस्ति। तस्यां कानिचित् पदानि रिक्तानि सन्ति। मञ्जूषायां दत्तानि पदानि सहायतायै । तानि पूरयित्वा कथां पुनः उत्तरपुस्तिकायां लिखत। (½X10 =5)

एकदा एकः (i) _________ नदीतीरे वसति स्म। सः प्रतिदिनं जलं पिबति स्म। एकस्मिन् दिने तत्र एकः (ii) _________ आगच्छत्। सः अत्यन्तं (iii) _________ आसीत्। कच्छपः तस्मै जलं (iv) _________। ततः उभौ मित्रे अभवताम्। एकदा शिकारी तत्र (v) _________। तं दृष्ट्वा कच्छपः जलमध्ये (vi) _________। मृगः अपि शीघ्रं (vii) _________। शिकारी निराशः (viii) _________। उभौ मित्रे परस्परं (ix) _________ अकुरुताम्। सर्वेभ्यः मैत्री सदा (x) _________ भवति।

मञ्जूषा

(आगच्छत्, अगच्छत्, कच्छपः, मृगः, पलायितः, तृषितः, अददात्, श्रेष्ठा, प्रविष्टः, धन्यवादम्,)

खण्ड–ग : अनुप्रयुक्तव्याकरणम् (28 अंकाः)

प्रश्न 5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धि विच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत -(1×3=3)

(i) (गिरि + ईशः) _________ कैलासे निवसति।

(ii) (सदा + एव) _________ सत्यं वदेत्।

(iii) (लोक + उपकारः) _________ महत् पुण्यं भवति।

अथवा

(i) श्रीरामः मर्यादा पुरुषोत्तमः _____ + _____ आसीत्।

(ii) छात्रः यदि + अपि _________ परिश्रमं करोति किन्तु सफलः न भवति।

(iii) सः अत्यधिकम् _____ + _____ न वदति।

प्रश्न 6. रेखाङ्कितपदानां समासाय विग्रहाय वा उचितविकल्पं चिनुत - (प्रश्नत्रयम्) (3×1=3)

(i) गुरुः देवालयम् गच्छति।

(अ) देवस्य आलयम् (आ) देवः च आलयः च

(इ) देवेन आलयम् (ई) देवात् आलयम्

(ii) सः हस्तलिखितं पुस्तकं पठति।

(अ) हस्तं लिखितं (आ) हस्तात् लिखितं

(इ) हस्तेन लिखितं (ई) हस्तस्य लिखितं

(iii) आकाशपतितं जलं पवित्रं भवति।

(अ) आकाशाय पतितं (आ) आकाशं पतितं

(इ) आकाशस्य पतितं (ई) आकाशात् पतितं

(iv) एषः शास्त्रेषु पण्डितः अस्ति।

(अ) शस्त्रपण्डितः (आ) शास्त्रपण्डितः

(इ) शास्त्रस्त्रपण्डितः (ई) विद्वान्

प्रश्न 7. अधोलिखितसमयान् संस्कृतेन लिखत - (प्रश्नत्रयम्) (3×1=3)

(i) प्रातः 6:00 _________ वादने अहम् उत्थामि।

(ii) विद्यालयः 8:45 _________ वादने प्रारभ्यते।

(iii) अपराह्णे 2:30 _________ वादने क्रीडाकालः भवति।

(iv) सायं 7:15 _________ वादने अहं गृहकार्यं करोमि।

प्रश्न 8. उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत - (4×1=4)

(यत्र, तत्र, अधुना, शीघ्रम्)

(i) _________ अहं संस्कृतपाठं पठामि।

(ii) _________ रामः गच्छति, _________ अहम् अपि गच्छामि।

(iii) रोगी _________ चिकित्सकं प्रति गच्छति।

प्रश्न 9. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्यययोः संयोज–नाय समुचितंविकल्पं चित्वा लिखत - (प्रश्नचतुष्टयम्) (4×1=4)

(i) बालकः पुस्तकं (पठ् + क्त्वा) _________ विद्यालयं गच्छति।

(अ) पठित्वा (आ) पठितुम्

(इ) पठन् (ई) पठितः

(ii) वयं संग्रहालयं (दृश् + तुमुन्) _________ इच्छामः।

(अ) दृष्ट्वा (आ) द्रष्टुम्

(इ) पश्यन् (ई) दृष्टः

(iii) छात्रः गुरुम् (प्र + नम् + ल्यप्) _________ उपविशति।

(अ) प्रनमित्वा (आ) प्रणम्य

(इ) प्रनमन् (ई) प्रणमितवान्

(iv) बालिका (हस् + शतृ) _________ गीतं गायति।

(अ) हसितुम् (आ) हसित्वा

(इ) हसन्ती (ई) हसिता

(v) बालकः (क्रीड् + शानच्) _________ गीतं गायति।

(अ) क्रीड्यमानः (आ) क्रीड्यमानम्

(इ) क्रीड्यमानान् (ई) क्रीड्यमाना

प्रश्न 10. अधोलिखितवाक्येषु उपपदविभक्त्यै उचितं विभक्तिरूपं चिनुत - (प्रश्नचतुष्टयम्) (4×1=4)

(i) _________ समक्षं सत्यं वद।

(अ) गुरुम् (आ) गुरोः

(इ) गुरुणा (ई) गुरवे

(ii) _________ विना जीवनं न सुखकरम्।

(अ) जलेन (आ) जले

(इ) जलस्य (ई) जलेषु

(iii) छात्रः _________ सह क्रीडति।

(अ) मित्रेण (आ) मित्रम्

(इ) मित्रस्य (ई) मित्राय

(iv) _________ नमः।

(अ) मातरम् (आ) मात्रे

(इ) मात्रा (ई) मातुः

(v) बालकः संस्कृते _________ कुशलः अस्ति।

(अ) भाषायाम् (आ) भाषाम्

(इ) भाषया (ई) भाषायाः

प्रश्न 11. अधोलिखितवाक्येषु कोष्ठकस्थशब्दस्य निर्दिष्टविभक्तेः उचितरूपं चिनुत तथा रिक्तस्थानानि पूरयत - (प्रश्नचतुष्टयम्) (4×1=4)

(i) _________ विद्यालये पठन्ति। *(विद्यार्थी – प्रथमा, बहुवचनम्)*

(अ) विद्यार्थी (आ) विद्यार्थिनः

(इ) विद्यार्थिभिः (ई) विद्यार्थिनम्

(ii) कृषकः _________ पश्यति। *(गौ – द्वितीया, एकवचनम्)*

(अ) धेनोः (आ) धेनुम्

(इ) धेन्वा (ई) धेन्वे

(iii) शिक्षकः _________ पुरस्कारं ददाति। *(युष्मद् – चतुर्थी, एकवचनम्)*

(अ) त्वाम् (आ) तुभ्यम्

(इ) त्वया (ई) तव

(iv) माता _________ आशीर्वादं ददाति। *(अस्मद् – चतुर्थी, बहुवचनम्)*

(अ) अस्मभ्यम् (आ) अस्मान्

(इ) अस्माभिः (ई) अस्माकम्

(v) एषः __________ विद्यालयः अस्ति। *(राम – षष्ठी, एकवचनम्)*

(अ) रामस्य (आ) रामम्

(इ) रामाय (ई) रामे

प्रश्न 12. अधोलिखितवाक्येषु कोष्ठकस्थधातोः निर्दिष्टलकारस्य उचितरूपं चिनुत - (3×1=3)

(i) बालकाः प्रतिदिनं गीतं __________। *(गै – लट्, प्रथमपुरुष, बहुवचनम्)*

(अ) गायति (आ) गायन्ति

(इ) गायसि (ई) गायामि

(ii) सीता ह्यः विद्यालयं __________। *(गम् – लङ्, प्रथमपुरुष, एकवचनम्)*

(अ) गच्छति (आ) अगच्छत्

(इ) गमिष्यति (ई) गच्छतु

(iii) यूयं श्वः समये __________। *(आ + गम् – लृट्, मध्यमपुरुष, बहुवचनम्)*

(अ) आगच्छथ (आ) आगमिष्यथ

(इ) आगमिष्यन्ति (ई) आगमिष्यामः

(iv) हे बालकाः! सर्वे मिलित्वा गीतं __________। *(गा – लोट्, मध्यमपुरुष, बहुवचनम्)*

(अ) गायत (आ) अगायत

(इ) गायथ (ई) गायन्तु

(खण्ड घ : पठितावबोधनम् ((27 अंकाः)

प्रश्न 13. अधोलिखितं गद्यांशं पठित्वा यथानिर्देशम् प्रश्नानाम् उत्तराणि लिखत -

अन्येद्युः सः मुनिः समन्विष्य तं धर्मव्याधं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत - "ब्रह्मन् ! किं पतिव्रतया तया इह त्वं प्रेषितः?" तत् आकर्ण्य सः मुनिर्विस्मितः तं धर्मव्याधम् अवदत् -"भद्र मांसविक्रयिणः ते कथम् ईदृशं विज्ञानम्" ? धर्मव्याधः अवदत् - "ब्रह्मन् ! अहं मातापित्रोर्भक्तः । तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि शाययित्वा च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां च मृगादीनां मांसानि स्वधर्म इति मत्वा वृत्त्यर्थं विक्रीणे, न तु धनलिप्सया। हे मुने। ज्ञानविघ्नोऽहङ्कारः । अतः स्वधर्मं चर, येन आशु परं श्रेयः अवाप्स्यसि ।"

ततश्च धर्मव्याधेन एवम् अनुशिष्टः स मुनिः तद्गृहं गत्वा धर्मव्याधस्य च सर्वं क्रियाविधिम् अवलोक्य परितुष्टः वनं गतवान् अवाप्तवान् च तदुपदेशात् सिद्धिम् ।

उक्तञ्च - कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः ।

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (1/2×2=1)

(i) धर्मव्याधः कस्य भक्तः आसीत्?

(ii) धर्मव्याधः किमर्थं मांसानि विक्रीणे?

(iii) कस्य उपदेशात् मुनिः सिद्धिम् अवाप्तवान्?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1×2=2)

(i) धर्मव्याधः स्वमातापितरौ कथं सेवते?

(ii) धर्मव्याधः धनलिप्सया मांसानि विक्रीणाति वा?

(iii) धर्मव्याधस्य उपदेशेन मुनिः किं प्राप्तवान्?

III. भाषिककार्यम्- (1×2=2)

(i) अनुच्छेदे 'अभिमानः' इत्यस्य पर्यायः कः?

(अ) विज्ञानम् (आ) अहङ्कारः

(इ) सिद्धिः (ई) परायणम्

(ii) 'अवाप्तवान्' इति क्रियापदस्य कर्तृपदं किम्?

(अ) धर्मव्याधः (आ) मुनिः

(इ) जनकादयः (ई) ब्रह्मन्

अथवा

(i) अनुच्छेदे 'शीघ्रम्' इत्यस्य पर्यायः कः?

(अ) आशु (ख) तेन

(इ) परम् (ई) एव

(ii) 'तौ हि मम परायणम्।' अत्र 'तौ' इति पदेन कौ निर्दिष्टौ?

(अ) मुनि–धर्मव्याधौ (आ) मातापितरौ

(इ) मृगौ (ई) जनकादयः

प्रश्न 14. अधोलिखितं नाट्यांशं पठित्वा यथानिर्देशम् प्रश्नानाम् उत्तराणि लिखत -

प्रतापः- धिङ् माम् अधन्यम् योऽहं मातृभूमिं रक्षितुम् असमर्थः। अलं मम एतेन जीवितेन। (दीर्घं निःश्वसिति)

(यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः)

राजपुत्रः - (राजोचितं प्रणम्य) विजयतां महाराजः, विजयताम् ।

प्रतापः - (समाश्वस्य) अयि भ्रातः ! कथं जयघोषं कृत्वा मां लज्जयसे ?

राजपुत्रः - देव ! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राज्यत्राणाय? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? विजेष्यते ननु भवान् !

प्रतापः - कुतस्तावद् विजयः ! स्वदेशमेव त्यक्तुं तत्परोऽहम् ।

भटः - (अञ्जलिं बद्ध्वा) महाराज! नैवं तावत् । स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः ।

प्रतापः - एवं न वक्तव्यम् । कृतज्ञोऽस्मि भवताम् अहम् । वीरैः धीरैः बहु उपकृतं देशस्य। स्वदेशे एव तिष्ठद्भिः भवद्भिः देशस्य स्वतन्त्रतायै प्रयत्नः समाधेयः ।

सर्वे भटाः - देशरक्षायै बद्धपरिकरा वयं तु भवन्तमेव अनुसरिष्यामः ।

प्रतापः - यथा रोचते भवद्भ्यः। प्रदेशोऽयम् अस्माभिः त्याज्यः एव ।

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (1/2×2=1)

(i) प्रतापः कं लज्जयितुम् न इच्छति?

(ii) प्रतापः कं त्यक्तुं तत्परः आसीत्?

(iii) देशरक्षायै के बद्धपरिकराः आसन्?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1×2=2)

(i) राजपुत्रः राज्यत्राणाय कं प्रशंसति?

(ii) भटाः प्रतापाय किं वचनम् अकथयन्?

(iii) प्रतापः भटेभ्यः किं वक्तुम् इच्छति?

III. भाषिककार्यम्- (1×2=2)

(i) 'अनुसरिष्यामः' इति क्रियापदस्य कर्तृपदं किम्?

(अ) प्रतापः (आ) राजपुत्रः

(इ) वयं (ई) सहचराः

(ii) संवादे 'कृतज्ञः' इत्यस्य विपरीतपदं किम्?

(अ) अधन्यः (आ) कृतघ्नः

(इ) स्वाधीनः (ई) वीरः

अथवा

(i) 'प्रविशति' इति क्रियापदस्य कर्ता कः?

(अ) प्रतापः (आ) राजपुत्रः

(इ) भटः (ई) सहचराः

(ii) संवादे 'स्वतन्त्रतायै' इति पदे का विभक्तिः प्रयुक्ता?

(अ) प्रथमा (आ) द्वितीया

(इ) चतुर्थी (ई) पञ्चमी

प्रश्न 15. अधोलिखितं पद्यांशं पठित्वा यथानिर्देशम् प्रश्नानाम् उत्तराणि लिखत -

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥
सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिःशपथेनापि जले लिखितमक्षरम् ॥

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (1/2×2=1)

(i) कः वैरी भवति?

(ii) शिलालिखितमक्षरम् कैः प्रोक्तम्?

(iii) जले लिखितमक्षरम् कैः भवति?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1×2=2)

(i) कः सभामध्ये न शोभते?

(ii) सद्भिः प्रोक्तं वचनं कथं भवति?

(iii) अपठितः बालः कथं न शोभते ?

III. भाषिककार्यम्- (1×2=2)

(i) 'शोभते' इति क्रियापदस्य कर्तृपदं किम्?

(क) बकः (ख) सभामध्ये

(ग) हंसमध्ये (घ) शिक्षकः

(ii) श्लोके 'असद्भिः' इत्यस्य विपरीतपदं किम्?

(क) सद्भिः (ख) शत्रुः

(ग) पिता (घ) बालः

अथवा

(i) 'प्रोक्तम्' इति क्रियापदस्य कर्तृपदं किम्?

(क) सद्भिः (ख) शिलालिखितम्

(ग) अक्षरम् (घ) लीलया

(ii) 'बालः' इत्यस्य विशेषणपदं श्लोके किम्?

(क) अपठितः (ख) शत्रुः

(ग) वैरी (घ) बकः

प्रश्न 16. अधोलिखितवाक्येषु रेखांकितान् शब्दान् आधृत्य प्रश्ननिर्माणं कुरुत - (1×5=5)

(i) <u>माधवः</u> उज्जयिन्याम् अवसत्।

(ii) <u>मूढैः</u> पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

(iii) विचारमग्नः <u>महाराणाप्रतापः</u> शिलायाम् उपविष्टः आसीत्।

(iv) <u>विद्याहीनाः</u> न शोभन्ते।

(v) वृक्षस्य उपरी <u>बलाका</u> अस्ति।

(vi) विद्यया <u>बालकस्य</u> पुनर्जन्म भवति।

प्रश्न 17. अधोलिखितस्य श्लोकस्य अन्वयं लिखत। (1/2×4=2)

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥

अन्वयः - अनेकसंशयोच्छेदि परोक्षार्थस्य (i) ------- भवति। शास्त्रम् (ii) ------ लोचनं (अस्ति), (तत्) यस्य नास्ति (iii) --------- अन्धः (iv) --------- भवति।

मञ्जूषा

एव, सः, दर्शकम्, सर्वस्य

अथवा

गच्छन् पिलीलको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥

अन्वयः - गच्छन् पिपीलकः (i) ---------- शतानि अपि (ii) ---------- । (अस्य विपरीतम्) (iii) --------- वैनतेयः अपि एकं पदम् न (iv) ----------- ।

मञ्जूषा

गच्छति, याति, अगच्छन्, योजनानां

प्रश्न 18. अधोलिखितां कथां मञ्जूषायाः पदसहायतया कथापूर्तिं कृत्वा पुनः लिखत - (1/2×10=5)

उज्जयिनी नगरे एकः माधवः नामकः (i) _______ अवसत्। सः एकं (ii) _______ पुत्रम् इव अपालयत्। माधवस्य एकः पुत्रः (iii) _______ । एकदा तस्य पत्नी अपत्यस्य रक्षार्थं ब्राह्मणं नियोज्य (iv) _______ कर्तुं गता। अत्रान्तरे माधवः राजगृहे श्राद्धं कारयितुं नृपेण आमन्त्रितः। दरिद्रतायाः कारणेन (v) _______ अचिन्तयत् यत् यदि अहं राजप्रासादं शीघ्रं न गच्छामि (vi) _______ तत्र अन्यः कश्चिद् ब्राह्मणः आगत्य श्राद्धं (vii) _______ , तदा तु मम हानिः भविष्यति। काचिद् वार्ता नास्ति। इमं पुत्रवत् चिरेण पालितं नकुलं बालकस्य (viii) _______ व्यवस्थाप्य गच्छामि। अयमेव बालकस्य भ्रातृवत् (ix) _______ करिष्यति। इदं विचिन्त्य ब्राह्मणः बालरक्षायां नकुलं विधाय राजप्रासादं (x) _______।

मञ्जूषा

(रक्षाम्, गतः, ब्राह्मणः, नकुलं, आसीत्, ग्रहीष्यति, रक्षायाम्, स्नानं, माधवः, तर्हि,)

======================== समाप्तम् ========================